# लघुवृत्तरत्नाकरः

**गणनियमः ।**

गणाः अष्ट- मगण-नगण-भगण-यगण-जगण-रगण-सगण-तगणाः भवन्तिते। गुरुःदीर्घः, लघुर्ह्रस्वः । त्रीणि वर्णानि संयुज्य गणो रूप्यते। वर्णनियमो यथा-

मस्त्रिगुरगस्त्रिलघुश्चनकारो भादिगुरुःपुनरादिलघुर्यः ।

जोगुरुमध्यगतो रलमध्यः सोऽन्तगुरुःकथितोऽन्तलघुस्तः ।।

मगणः - त्रिगुरुः

नगणः - त्रिलघुः

भगणः - आदिगुरुः

यगणः - आदिलधुः

जगणः -मध्यगुरुः

रगणः-मध्यलघुः

सगणः - अन्तगुरुः

तगणः - अन्तलघुः ।

श्लोकेषु कदाचिद् लघुः रूपान्तरं प्राप्य गुरुर्जायते। अत्र व्यवस्था भवन्ति -

सानुस्वारोविसर्गान्तःदीर्घो युक्तपरश्च यः ।

वा पादान्तेत्वसौग्वक्रोज्ञेयोऽन्यो मात्रिको लृजुः ।।

अनुस्वारसहितः,(मं कं ) विसर्गयुक्तः (चः सः ) दीर्घः (धा पा) युक्तपरः (वक्त्रः -अत्र वकारः) तथा पादान्ते वर्तमानः लघ्वक्षरश्चगुरुर्भवति ।

**१) इन्द्रवज्रा**

**लक्षणम्- स्यादिन्द्रवज्रा यदितौजगौ गः ।**

यस्य शलोकस्य पादेषु तगणद्वयं, जगणः अन्तिमेंगुर्वक्षरद्वयंच सन्तितत्रइन्द्रवज्रानाम वृत्तं भवति।

**उदाहरणम्।**

त त ज ग ग

**कंसाय/ ते शौरि/ सुतत्व /मुक्त्वा**

**तंतद्व/ धोत्कं प्र/ तिरुध्य/ वाचा ।**

अत्र ळक्षणसमन्वयाद् इन्द्रवज्रा नाम वृत्तं भवति ।

**२) उपेन्द्रवज्रा**

**लक्षणम्-उपेन्द्रवज्राजतजास्ततोगौ ।**

यस्मिन् पादेजगणःतगणःजगणः अनन्तरंगुर्वक्षरद्वयञ्च संभवतितत्रउपेन्द्रवज्रा वृत्तं भवति ।

**उदाहरणम्**

ज त ज ग ग

**भवद्प्र/ भावावि/ दुराः हि/ गोपा**

**स्तरुप्र/पतादि/कमत्र/ वीक्ष्य ।**

लक्षणसमन्वयाद्उपेन्द्रवज्रा ।

**३) मन्दाक्रान्ता**

**लक्षणम् - मन्दाक्रान्ता जलधिषडगैम्भौनतौताद्गुरूचेद् ।**

यस्मिन्काव्ये पादेषु मगण भगणनगणतगणद्वयञ्च संभवतितत्र मन्दाक्रान्तानाम वृत्तं भवति ।पादेषु चतुर्थ षष्ठ सप्तम वर्णेषु यतिः स्याद्।

**उदाहरणम् -**

म भ न त त ग ग

**कश्चिद्का/ न्ताविर/ हगुरु/ णा स्वाधि/ कारादप्र/मत्तः**

**४) शार्दूलविक्रीडितम्**

**लक्षणम्- सूर्याश्वैर्मसजस्ततःसगुरवः शार्दूलविक्रीडितम् ।**

यत्रकाव्ये चरणेषु मगण सगणजगणसगणतगणद्वयंगुरुश्च संभवतिचेद् शार्दूलविक्रीडितम् भवति।तत्रद्वादशाक्षरे सप्तमाक्षरे च यतिः संभवति।

**उदाहरणम्-**

**म स ज स त त ग**

**स्तंभे घ/ट्टयतो /हिरण्य/कशिपौः/ कर्णौस/ माचुर्ण/ यन्**

लक्षणसमन्वयाद् शार्दूलविक्रीडितम् भवति।

## भागवतम्- चतुर्थस्कन्धेद्वितीयाध्यायः

व्यासेन प्रतिबोधिते श्रीमद् भागवतपुराणे भगवतो वासुदेवस्य कथाः उपवर्णिताः । द्वादशस्कन्धपर्यन्तेषु कथांशेषु भगवतःदशावताराः वर्णिताःदृश्यते। तत्रचतुर्थस्कन्धेदक्षप्रजापतेः यागविघ्नः भगवतो परमेश्वरस्य क्रोधश्च प्रपञ्चिताः ।

ब्रह्मणः सत्रसदस्यागच्छन्तंदक्षप्रजापतिं वर्णयतिकविः ।

स्वयंभुवे मन्वन्तरे लोकाभिवृद्धिमिच्छन्तो मुनयःदेवाश्च सत्रंकर्तुमारभत । ऋत्विग्भिः फलमनिच्छद्भिः लोकाभिवृद्ध्यर्थक्रियमाणो यागः सत्रम्। अस्मिन् सत्रे वसिष्ठनारदादि ऋषय- इन्द्रादिदेवाः अग्न्याद्यभिमानिदेवताः मरीचिर्दक्षप्रभृतयो प्रजापतयश्च सन्निधिमकुर्वन्।

तन्महत्सदः रोचिषा वितिमिरंकुर्वन्तं अर्कमिव भ्राजमानंक्षत्र प्रविष्टंदक्षं दृष्ट्वातद्बासा आक्षिप्ततेजसः सदस्याः ऋषयः सहाग्नयःविरिञ्चं शर्वञ्च ऋते स्वधिष्णेभ्यः उदतिष्ठन्। सदसस्पतिभिः साधु सद्कृतो भगवान्दक्षः लोकगुरुमजंनत्वातदाज्ञया स्वस्थाने निषसाद ।दक्षःकान्त्या सूर्यमत्यवर्तिष्ट। तस्य भासाः आशाःवितिमिराः बभूवुः ।

दक्षस्य शिवदूषणम्-

दक्षस्य आगमनाद् पूर्वमेवभगवान् परमेश्वरः सत्रमलङ्चकार। तस्मिन् आगतेऽपि शिवः पूर्वावस्थायामेव अवर्तत। श्वशुरंदक्षं दृष्ट्वा उत्थानादिक्रियाःन प्राकटयदित्यर्थः । तेनक्रुद्धोदक्षः सर्वेषां श्रद्धामाकृष्य सज्जनचरितानि सर्वेभ्यो बोधयितुमनाःइव एवमुवाच। शिवः गर्विष्ठः , अतः सद्भिराचरितो मार्गःतेनत्यक्तः। अतः सःनिरपत्रपः लोकपालानां यशोघ्नश्च भवति। शिष्यतां प्राप्तः अयं सर्वाङ्गसुन्दरीं सद्वृत्तां सतीं परिणिनाय।वेदोक्ताः गृहस्थधर्माः अनेन परित्यक्ताः । अतः अयं लुप्तक्रियःइतिविश्रुतः. अस्मैदुर्गुणसम्पन्नाय पुत्रीमदामितिदक्षस्य दुःखम्।

लौकिकानां घोरेषु श्मशानप्रदेशे, शिवः वसति। सःनग्नः भूतैरावृतः केशदेहसंस्कारक्रियां परित्यज्य रुदन् यतेष्टं विहरति। परमेष्ठिनो ब्रह्मणः प्रेरणैवतन्मया आचरितमितिदक्षः अतीवदुःखितः।

## नारायणीयम्- षट्सप्ततितमोऽध्यायः- उद्धवदूत्यम्

भागवतस्य संग्रहो भवतिनारायणीयम्। तस्य कर्ता भवति मेल्पुत्तूर्नारायणभट्टः। गदशमनार्थंगुरुवायुपुरेश्वरं भजन्तं भक्तंनारायणभट्टंनिर्व्यधमकरोद् भगवानिति प्रथा अपि वर्तते।

षट्सप्ततितमोऽध्याये उद्धवदूत्यं वर्ण्यते। गुरोस्सान्दीपनेःकरुणया चतुष्षष्टिमात्रैरहोभिः सर्वज्ञो भूत्वा कृष्णः मथुरामागतः। तत्र आगत्य सखीःगोपीरनुस्मरन्देवःताः सान्त्वयितुं परमसुहृदमुद्धवमप्रेषयद्।

कृष्णस्य निर्देशेनगोकुलं प्राप्तः उद्धवः कृष्णस्य पितरौ पश्यन् सान्त्वयामास। कृष्णस्य मणिमयरथं दृष्ट्वा शङ्किताःगोप्यः कृष्णःगोकुलमागतःइति मत्वात्यक्तकार्याः शीघ्रमागताः। प्रेमभारप्रणुन्नाःताः भगवतोविलसितानि स्मारं स्मारं व्यलपन्। ताःगद्गदवाचः सत्यः सौजन्यादीन् विस्मृत्यकथमपि कृष्णमधिकृत्य वर्णयितुमारेभे। रासक्रीडालुलितललितं विश्लथत्केशपाशं श्रमजलकणयुक्तं भगवतः लोभनीयमङ्गं पुनःदर्शयितुंताः प्रार्थयामासुः।कृष्णगाथाःतत्र प्रचलन्ति, कृष्णकथाःताः सर्वदाकथयन्तितंमधिकृत्य सदाताःगायन्ति। तत्सर्वं दृष्ट्वा उद्धवः अधिकं व्यमुहद्। तासां भक्त्युद्रेकं दृष्ट्वा उद्धवःनिरभिमानीचाभवदद्।

## मालविकाग्निमित्रम्

**कथासंग्रहः**

कविकुलगुरोःकालिदासस्य नाटकत्रयेष्वन्यतमं भवति मालविकाग्निमित्रं। विदिशेस्वरस्य अग्निमित्रस्य मालविकायाश्च प्रणयकथा अत्र वर्ण्यते। अभिनयदृष्ट्या सरलप्रतिपादनरीत्या च नाटकमतीव हृदयङ्गमम्।

धारिणीइरावती भवतः अग्निमित्रस्य पत्न्यौ। मालविकानामकनर्तकींचित्रे पश्यन् राजा मोहितो बभूव। बालसुलभचञ्चला तस्य पुत्री वसुमतीइयं मालविकेति राजानंन्यवेदयत्। अग्निमित्रः मालविकानुनयनार्थं विदूषकं गौतमंन्ययोजयत। तदर्थं विदूषकःनाट्याचार्ययोः हरदत्त-गणदासयोः परस्परस्पर्धामायोजितवान्। शिष्यायाःनृत्तप्रकटनेनकः उत्तमःगुरुरितिज्ञातुं शक्नोति । नृत्तावसरेगणदासस्य शिष्यां मालविकां द्रष्टुं शक्यते। नर्तनावसरेधारिणी पण्डितकौशिकी च तत्रागते।

शर्मिष्ठायाःछलितनामकनृत्तस्य रङ्गाविष्कारः एव मत्सरसेयोपाधिः। स्वाबाविकवेषभूषादिभिरवतरेन्नाट्यःइतिकौशिक्याः उपाधिः। वयोवृद्धःइति परिगणनयागणदासाय प्रथमावसरो लब्धः। सदसि सर्वे आगताः, अचिरादेव मालविका रङ्गमागत्यनर्तयितुमारेभे। तस्याः परिपुष्टलावण्याङ्गप्रत्यङ्गदर्शनेन राजा अधीरोऽभवत्।

धारिण्याः अन्तःपुरसमीपप्रमदवनेक्षया परिपालितःकश्चन अशोकवृक्षः असीद्। सुवर्णपुष्पाणिजायन्तेइत्यस्माद्कारणादस्य तपनीयाशोकइति प्रथामलभत। उन्नतकुलप्रसूतायाःकस्याश्चननार्यः पादसम्पर्केण अयं पुष्पितो भवेद्।एकदाधारिणी दोळातः परिभ्रष्टाभवद्। पादौ सरुजावितिकारणेन वृक्षस्य दोहदपरिपूर्त्यर्थं मालविकानियोजिता। सख्या बकुलोवलिकया साकं सा प्रमदवनमगमद्। नियोगभूमिं प्राप्य नूपुरेण आलक्तकरसेन च अलङ्कृतचरणा सा अशोकवृक्षाय दोहादमकरोद्। राजा विदूषकश्च तस्मिन्नेवावसरे प्रमदवनमापतुः। यदृच्छया परस्परं पश्यन्तौनायिकानायकौ सन्तुष्टावभवताम्। इरावत्याः आगमनेनतयोस्समागमस्य परिसमाप्तिमभवद्।अमुं वृत्तान्तं परिश्रुत्यक्रुद्धाधारिणी मालविकां सखीञ्च कारागृहमनयद्। विदूषकः सर्पदंशनव्याजकथयादेव्याः अङ्गुलीयकं संपाद्यतद्दर्शनेनतां कारागृहादमोचयद्।मालविकायाः अग्निमित्रस्य च समागमः समुद्रगृहे संभूतम्। तत्रापि इरावत्याः आगमनंनायकयोः प्रणयसल्लापं रुरोध।

तस्मिन्नेवावसरे प्रमदवनपालिकातपनीयाशोकमुन्मीलितमिति उद्घोषितवती। मानविकाकुलीनेति ज्ञापयितुम्तदेव अलम्। तदा माधवसेनेनविदर्भराज्ञा प्रेषिते द्वेचेट्यौधारिण्याः सकाशमागतम्। तेतु मालविकां राजदारिकेति ज्ञापयामास। पूर्वं माधवसेनेन राज्ञिअग्निमित्रे अर्पयितुं प्रेषिता राजकन्या मालविकाविधिवैपरीत्याद्चेटीवृत्तिमन्वभवदितिकथाताभिः वर्णिताः।अन्तेधारिण्याः अनुज्ञयाद्वयोः मालविकाग्निमित्रयोः समागमेननाटकस्यान्तं संभूतम्।

# काव्यप्रकाशः

**काव्यप्रयोजनम्-**

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।

सद्यःपरनिर्वृतयेकान्तासम्मिततयोपदेशयुजे।।

**काव्यकारणम्**

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यपेक्षणाद्।

काव्यज्ञशिक्षयाभ्यासःइति हेतुस्तदुद्भवे।।

**काव्यलक्षणम्**

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनःक्वापि।

**काव्दभेदः**

उत्तमं-इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैःकथितम्।

मध्यमं- अतादृशिगुणीभूतव्यङ्ग्यं व्यङ्ग्येतु मध्यमम्।

अधमं- शब्दचित्रं वाच्यचित्रमव्यङ्ग्यंत्वरं स्मृतम्।।

शव्दःत्रिविधः- वाचकः, ळक्षकः व्यञ्जकः च।तात्पर्यार्थोऽपि केषुचिद्।

सङ्केतिकमर्थंमभिधत्ते यः सः **वाचकः** शब्दः। सङ्केतितश्चतुर्भेदोजात्यादिर्जातिरेव वा।।

मुख्यार्थबादेतद्योगे रूढितोऽथ प्रयोजनाद्।

अन्यार्थो लक्ष्यते यद्सा**लक्षणा**रोपिता मता।।